A

811

**SAMAGRA SHIKSHA, KERALA**

**First Terminal Evaluation- 2023-24**

First Language - Paper I - Part I

# SANSKRIT

(For Academic and Oriental Sanskrit Schools)

**Class- VIII**
Time 1 ½ Hours                                                                                     Total Score - 40

**निर्देशाः -**

- १५ निमेषाः समाश्वासकालः।
- प्रश्नान् निर्देशान् च सम्यक् अवगम्य एव उत्तराणि लेखनीयानि।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नात् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिः उपयोक्तव्या।

**1. अधोदत्तेषु चतुर्णां प्रश्नानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत।** **4x1=**

क) रजनी कथं गच्छति?

(शीघ्रम्, मन्दम्, अभिमुखम्, सामोदम्)

ख) योगसूत्रस्य प्रणेता कः?

(वाल्मीकिः, वेदव्यासः, पतञ्जलिमहर्षिः, आलत्तियूर् नम्पी)

ग) किं गणे नान्तर्भवति ?

(मरीचम्, आलुकम्, भेण्डम्, ऊर्वरकम् )

घ) ग्रामीणः केन रोगेण वैद्यगृहं प्राप्तवान्?

(उदरवेदनया, शिरोवेदनया, पादवेदनया, दन्तवेदनया)

ङ) पार्थसारथिः कः भवति?

(अर्जुनः, व्यासः, श्रीकृष्णः, अरुणः)

**2. यथोचितं योजयत।** **4x1=4**

| | | |
|---|---|---|
| क) भगवद्गीता | - | फलम्। |
| ख) दाडिमम् | - | ध्यानासनम्। |
| ग) विभातम् | - | महाभारतम्। |
| घ) पद्मासनम् | - | प्रभातम्। |

3. उदाहरणानुसारं सन्धिच्छेदं लिखत। 1x1=1

उदा - पुत्रस्तु - पुत्रः + तु।

क) दीपस्तु - ........ + ........।

4. अधोदत्तवाक्यात् सम्बोधनपदं चित्वा लिखत। 1x1=1

क) भो महाशय! कुतः एतादृशं ज्ञानं लब्धम?

5. उदाहरणानुसारं लिखत। 1x1=1

उदा- प्रत्यध्यायम् - अध्याये अध्याये।

क) प्रत्यक्षरम् -

6-10 प्रश्नेभ्यः चतुर्णाम् उत्तराणि लिखत । 4x2=8

6. कोष्ठकात् समुचितं क्रियापदं चित्वा वाक्यं पूरयत।

(करोमि, पचति)

क) अहं मितभोजनं .............।

ख) माता भोजनं ..................।

7. 'भ्रमराः पुष्पेभ्यः मधुरं पिबन्ति' इत्याशययुक्तं पद्यांशं चित्वा लिखत।

क) मन्दं मन्दं गच्छति रजनी<br>
तारागणसहिता।<br>
अभ्यागच्छति सूर्यस्तापित-<br>
कनकारुणकिरणः।।

ख) पिबन्ति मधुरं मधुपाः समुदं<br>
सुमात्सुमं गत्वा ।<br>
कलाविकः सन्तुष्ट्या गायति<br>
प्रभातभूपालम्।।

8. उदाहरणानुसारं 'यदा- तदा' उपयुज्य वाक्यं परिवर्तयत ।

उदा - पिता प्रत्यागच्छत्। पुत्रः सर्वं न्यवेदयत्।

यदा पिता प्रत्यागच्छत् तदा पुत्रः सर्वं न्यवेदयत्।

क) वाहनम् आगच्छत्। वाजी आरोहत्।

9. उदाहरणानुसारं वाक्यं परिवर्त्य लिखत ।

उदा - प्रवीणः चित्रं पश्यति । प्रवीणः चित्रम् अपश्यत्।

क) सङ्गीता गीतं गायति । ................................. ।

10. **अधोदत्तपदानि पठित्वा शाकानि पुष्पाणि च चित्वा पट्टिकां पूरयत।**

पटोलः, पाटलम्, भेण्डः, मरीचम्, जपाकुसुमम्, कमलम्

| शाकानि | पुष्पाणि |
|---|---|
| मरीचम् | जपाकुसुमम् |
| ............ | ........... |
| ............ | ........... |

**11-13 प्रश्नेभ्यः द्वयोः उत्तरे लिखत।** **2x4=8**

11. **दत्तानि पदानि उपयुज्य सम्भाषणांशान् पूरयत।**

(चित्रशालाम्, कुत्र, आगच्छतु, प्रियमानसं)

विवेकः - नमस्कारः।

दिलीपः - नमस्कारः। ................गच्छसि ?

विवेकः - अहं .................. गच्छामि।

दिलीपः - चित्रशालां गच्छति वा? किं चलच्चित्रम्?

विवेकः - अद्य .............. नाम संस्कृतचलच्चित्रं भवति।

दिलीपः - तर्हि अहमपि आगच्छामि वा?

विवेकः - आम्। ...............।

12. **पद्यं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।**

विभातपुष्पसुगन्धसमेतो
वाति च मृदुपवनः।
प्रशान्तशीतलसमयोऽद्यात्र
ददाति मे सौख्यम्।।

क) विभातपुष्पसुगन्धसमेतः कः ?

ख) प्रशान्तशीतलसमयः किं ददाति?

ग) **समयोऽद्य** - पदच्छेदं लिखत।

घ) कवितायाः एकं क्रियापदं चित्वा लिखत।

13. **सूचनानुसारं धनुरासनम् अधिकृत्य लघूपन्यासं लिखत।**

**सूचनाः** - योगदर्शनम् -व्यायामासनम् -उदरपेशीबलम्- मलावरोधः- वातरोगः।

www.educationobserver.com

14-16 प्रश्नेभ्यः द्वयोः उत्तरे लिखत ।	2x4=8

14. खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।

केरलेषु प्रसिद्धेषु कथाकारेषु अन्यतमः भवति एम्.टि.वासुदेवन् नायर्। चलच्चित्रपटकथाकारः, निदेशकः चायं १९३३ जुलाई १५ तमे दिनाङ्के जनिमलभत। ओरु वटक्कन् वीरगाथा, सदयं इत्यादीनि तस्य पटकथायां निर्मितानि चलच्चित्राणि भवन्ति। रण्टाम् ऊषम्, मञ्ञ्, नालुकेट्ट् इत्यादयः तेन रचिताः विश्रुताः ग्रन्थाः सन्ति। सः १९९५ तमे वर्षे ज्ञानपीठपुरस्कारं प्राप्नोत्।

क) अत्र प्रतिपादितः प्रसिद्धः कथाकारः कः?

ख) कस्मिन् वर्षे एम्.टि.वासुदेवन् नायर् ज्ञानपीठपुरस्कारं प्राप्नोत्?

ग) एम्.टि.वासुदेवन् नायर् कदा जनिमलभत ?

घ) प्रसिद्धाः - इत्यर्थे प्रयुक्तं पदं किम्?

15. उदाहरणानुसारं पट्टिकां पूरयत।

निर्माय, कृत्वा, उत्थाय, दत्वा, मत्वा, विसर्ज्य

| | क्त्वान्तम् | ल्यबन्तम् |
|---|---|---|
| उदा- | दत्वा | उत्थाय |
| | ........... | ........... |
| | ........... | ........... |

16. सूचनानुसारं जैवकृषिरीतिमधिकृत्य लघुटिप्पणीं लिखत ।

सूचनाः - जैवकृषिरीतिः- कृषिक्षेत्रसज्जीकरणम्- बीजानां वपनम् - कीटानाम् अपनयनम् - जैवोर्वरकम् ।

17. प्रादेशिकभाषया विवर्तयत।	1x5=5

भासः विश्वप्रसिद्धः संस्कृतनाटककारः भवति। तस्य जीवनकालः क्रिस्तोः पूर्वं पञ्चमशतकम् इति पण्डितानां मतम्। सः त्रयोदश नाटकानि रचितवान्। तेषु स्वप्नवासवदत्तम्, बालचरितम्, ऊरुभङ्गम् इत्यादीनि प्रसिद्धानि। भासः महाभारतात्, रामायणात् च कथांशान् स्वीचकार।